आहुतिं जुहुयात् । ततो मूलान्ते) । "अन्तर्निरन्तरनिरिन्धनएधमाने मायान्धकारपरिपन्थिनि संविदग्नौ । कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ विश्वं जुहोमि वसुधादिशिवासनान्तम् । इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् । न तस्य पापपुण्यानि जीवन्मुक्तोभवेद्ध्रुवम्" । 'अयमन्तर्यागोज्ञानिनामेव । अथान्तःपञ्चमकारयजनप्रकारः ॥ तदुक्तं कुलार्णवे अन्तर्यजने" । "सुरा शक्तिः शिवोमांसं तद्भोक्ता भैरवःस्वयम् । तयोरैक्यसमुत्पन्न आनन्दोमोक्ष उच्यते । आनन्दं ब्रह्मणोरूपं तच्च देहे व्यवस्थितम् । तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते । लिङ्गत्रयविशेषज्ञः षट्चक्रपद्मभेदतः । पीठस्थानानि चागम्य महापद्मासनं व्रजेत् । आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः । चिच्चन्द्रकुण्डलीशक्तिसामरस्यमहोदयः । व्योमपङ्कजनिष्यन्दसुधापानरतो नरः । मधुपानमिदं देवि ! चेतरन्मद्यपानकम् । पुण्यापुण्यं पशुं हत्वा ज्ञानखड्गेन योगवित् । परे लयं नयेच्चित्तं पलाशीति निगद्यते । मानसादिन्द्रियगणं संयम्यात्मनि योजयेत् । मांसाशी स भवेद्देवि ! इतरे प्राणिघातकाः । शिवशक्त्यात्ममिथुनसंयोगानन्दनिर्भराः । मुक्तास्ते मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः" इति त॰सा॰ "अन्तःपूजां विधायैव बाह्यपूजां समाचरेदिति" तन्त्रम् ।

**अन्तर्याम** पु॰ अन्तर्यामो यस्मात् । ग्रहरूपे सामापराख्ये पात्रभेदे । "त्रिष्टुभः स्वारं स्वारादन्तर्यामः 'अन्तर्यामात् पञ्चदश" इति यजु॰ १२,५५ स्वारात् साम्नोऽन्तर्यामं ग्रहं निरमिमीतेति" श्रुतेरिति वेददीपः । तच्च यज्ञियं पात्रभेदः । "हुत्वा सूर्य्यायान्तर्याममनुमन्त्रयेदिति" श्रुतिः "उन्नेतः पात्रयोजनमित्युपक्रम्य" खरोत्तरपूर्व्वार्द्धे उपांश्वन्तर्यामयोः" कात्या॰ ९,१,२, खरस्य उत्तरपूर्व्वार्द्धे ईशानकोणे, उपांश्वन्तर्यामयोः पात्रयो र्योजयति सादयतीति वा" तद्व्या॰ ।

**अन्तर्यामिन्** पु॰ अन्तर्मध्येऽनुप्रविश्य यमयति स्वस्वकर्म्मणि इन्द्रियादीनि जीवं वा व्यापारयति यम+णिच्—णिनि । "अन्तराविश्य भूतानि यो बिभर्त्त्यात्मकेतुभिः । अन्तर्यामीश्वरः साक्षात् भवे"दित्युक्ते ईश्वरे 'अन्तरेष यमयतीत्यादि" वृहदारण्यकान्तर्यामिब्राह्मणोक्तेस्तस्य तथात्वम् । आत्मकेतुभिः निजव्यापारैः प्राणादिवृत्तिभिरित्यर्थः । वायौ च तस्य सर्व्वप्राणिषु अध्यात्मवायुरूपेण स्थितत्वात्तथात्वम् । अन्तर्गतवस्तुज्ञातरि त्रि॰ ।

**अन्तर्यामिब्राह्मण** न॰ अन्तर्यामिन ईश्वरस्य ज्ञापकम् ब्राह्मणं मन्त्रेतरवेदभागः । वृहदारण्यकान्तर्गते अन्तर्यामिनः ईश्वरस्य ज्ञापके ब्राह्मणे । तच्च १२०पृष्ठे दर्शितम् ।

**अन्तर्लोम** न॰ अन्तर्गतमाच्छाद्यं लोम अच् समा॰ । आच्छाद्ये लोम्नि ।

**अन्तर्वंशिक** त्रि॰ अन्तर्वंशे राज्ञामाभ्यन्तरगृहे नियुक्तः नियुक्तार्थे ठक् संज्ञापूर्व्वकविधेरनित्यत्वान्न वृद्धिः, अन्तर्वंशः नियोज्यतयाऽस्त्यस्य ठन् वा । राज्ञामन्तःपुरे रक्षणार्थं नियुक्ते कुब्जवामनादौ ।

**अन्तर्वण** अव्य॰ वनस्य मध्यम् णत्वम् । वनमध्ये इत्यर्थे ।

**अन्तर्वत्नी** अन्तरस्त्यस्य गर्भ इति वाक्ये "अन्तर्वत्पतिवतोर्नुगिति" पा॰ अन्तःशब्दस्याधिकरणशक्तिप्रधानतयाऽस्तिसामानाधिकरण्याभावात् अप्राप्तौ मतुप् अदुपपत्त्वे मस्य वः नुक् च । गर्भवत्याम् स्त्रियाम् । 'तस्यामेवास्य यामिन्यामन्तर्वत्नी प्रजावती सुतावसूत सम्पन्नाविति" रघुः । अन्तःशब्दस्य तत्स्थलक्षणया अस्त्यर्थे मतुप् मस्य वः । अन्तःस्थपदार्थवति त्रि॰ । "पुमानन्तर्वान् स्थविरः पयस्वानिति" अथ॰ ९,४,३, ।

**अन्तर्वमि** पु॰ अन्तःस्थित एव वाणयति उद्गारशब्दं कारयति वण-शब्दे इन् णस्य मत्वम् । (ढेकुर) इतिख्यातस्योद्गारशब्दस्य कारके अजीर्णनामके रोगभेदे ।

**अन्तर्वर्त्तिन्** त्रि॰ अन्तः मध्ये वर्त्तते वृत—णिनि । मध्यवर्त्तिनि । 'अन्तर्वर्त्तिनीं विभक्तिमाश्रित्येति" सि॰कौ॰ ।

**अन्तर्वा** त्रि॰ अन्तः अन्तरङ्गभावम् अन्तःकरणं वा वाति गच्छति स्निग्धत्वेन वा—गतिगन्धनयोः विच् । पुत्रपश्वादिषु ।

**अन्तर्वाणि** त्रि॰ अन्तर्गता अन्तःकरणे स्थिता शास्त्रवाक्यात्मिका वाणी यस्य ब॰ समासान्तविधेरनित्यत्वान्न कप् ह्रस्वश्च । बहुशास्त्रवाक्याभिज्ञे पण्डिते ।

**अन्तर्वावत्** त्रि॰ अन्तर्वाः पुत्रादिरस्त्यस्मिन् मतुप् मस्य वः । पुत्रादिमति "अन्तर्वावत् क्षयं दधे" इति ऋ॰ १,४०,७, 'अन्तर्वावत् अन्तःस्थितपुत्रादिमत्त्वात् बहुगुणोपेतं क्षयं गृहमिति" भा॰ ।

**अन्तर्वाष्प** त्रि॰ अन्तर्गतं वाष्पम् । वाह्याप्रकाशिते कण्ठपर्य्यन्तप्राप्ते रोदनजन्यजलकणे । ब॰ । तद्युक्तपदार्थे त्रि॰ । "अन्तर्वाष्पविलोचने" इति ।

**अन्तर्विगाह** पु॰ अन्तर्भूत्वा विगाहः । मध्यप्रवेशे । ल्युट् । अन्तर्विगाहनमप्यत्र न॰ हेम॰ ।

**अन्तर्वेदि** पु॰ अन्तर्गता वेदिर्यत्र देशे । ब्रह्मावर्त्तदेशे, स च देशः आ प्रयागात् हरिद्वारपर्य्यन्तो गङ्गायमुनयोर्मध्यदेशः ।